NANDADUL AL MANDAL

Assistant Professor

Department of Education

WhatsApp No-9533608266, Contact No-8617528423

Mail id-nandadulalmandal38@gmail.com

21.04.2020, 1nd Year, 7th (क) Period, 7प Paper, 4rd Unit, 4.2

# ***<u>शिक्षकाः- विशेषताः,कर्तव्यानि,कार्यशैली, उत्तरदायित्वानि च</u>***

पूज्य-पुरातन आर्यभूखण्डेऽस्मिन् वैदिककालादारभ्यैव मूल्यानां विषये चिन्तनं,मूल्यानां व्यवहारे आनयनम् इत्येतेषाम् आदर्शभूतमिति उक्तमस्ति मनुस्मृतौ। तद्यथा-

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**

**स्वं स्वं चरित्रं शिक्षेरन्पृथिव्यां सर्वमानवाः।।**(2.20)

चतुर्षु वेदेषु, वेदाङ्गेषु,उपाङ्गेषु,संस्कृतसाहित्ये च मूल्यानां विषये अपरिमितानि उद्धारणानि समुपलभ्यन्ते। संस्कृतवाङ्मये मूल्यम् इति शब्दः

**शिक्षकस्य विशेषताः-**

शिक्षकस्य बहवः पर्यायपदानि सन्ति। ते यथा- गुरुः, अध्यापकः, प्राध्यापकः, आचार्यं, उपाध्यायः इत्यादयः। एतेषां विशेषार्थाऽपि भवन्ति। यथा आचार्यस्य अर्थः- छात्रस्याचारं ग्रहणं करोतीति। पुरुषार्थचतुष्टये धर्मार्थकाममौक्षाः अन्तर्गच्छन्ति। तत्र यद्यपि अर्थकामयोः प्राधान्यम् ऋत्विग्भिः वर्णितमस्ति,तथापि धर्मस्य प्राधान्यं अर्थात् आधुनिकदृष्ट्या जीवनमूल्यानां प्राधान्यं निर्दिष्टमेव। अतएव धर्मेण हीनौ अर्थकामौ परित्याज्यौ एव इति तेषां मतमासीत्। अर्थात् जीवनयापनाय भौतिकतायाः आवश्यकताः सन्ति एव । तत्र धर्महीना भौतिकता त्याज्या एव इति प्राचीनानां मतम्। उक्तं च मनुना-

**परित्यजेत् अर्थकामौ यौ स्यातां धर्मवर्जितौ।**

**धर्मश्चान्यसुखोदर्को लोको वित्कृष्ट एव च।।** इति।

एते धर्माः सर्वेभ्यः वर्णेभ्यः समानाः भवन्ति। मनुना उक्तं यत्-

**धृतिः क्षमाः दमोऽस्तेयः शौचमिन्द्रियनिग्रहः।**

**धीर्विद्या सत्यमक्रोधः दशकं धर्मलक्षणम्।।**

एतेषां पालनं क्रियते चेत् सर्वविधमुल्यानां कर्तव्यानां दायित्वानां च विकासः जायते।

आधुनिकसमाजिकपरिप्रेक्षे वैयक्तिकं, सामाजिकञ्च दायित्वेषु संघर्षः दृश्यते केचन् परन्तु एतयोः परस्परं सम्वन्धं वर्तते। अयं भावः यदि स्पष्टो भवति तर्हि मूल्यानां सम्प्रत्ययः अपि स्पष्टो भविष्यति।

विश्वासव्यावहरयोः विकासेन मूल्यानां विकासः एतयोः ह्रासेन मूल्यानां ह्रासः जायते। मूल्यम् अर्थात् योग्यं युक्तम् उचितम् अनुष्टेयम् इति अर्थान् वोधयति। तथा च व्यवहर्तुं योग्याः गुणाः आत्मसातकरणीयाः गुणाः अनुष्टेयाः गुणाः एव मूल्यमिति वक्तुं शक्यते।

**शिक्षकानां कर्तव्यानि-**

1.छात्राध्यापकानां मूल्यविषयकजागृतेः अभिज्ञानम्।

2.विविधेषु मूल्येषु प्रधानाप्रधाननिर्धारणम्।

3.मूल्यानां प्राथम्यतारक्रमस्य निर्धारणम्।

4.नैतिकमूल्यानां ह्रसस्य कारणान्वेषणम्

5. नैतिकमूल्यानां संरक्षणोपायानां चिन्तनम्।

6.मूल्यानां हस्तान्तरणाय पाठ्यक्रमे अपेक्षितपरिवर्तनाम् अभिज्ञानम्।

7.प्रशिक्षणस्तरे मूल्यानाम् आत्मसात्करणार्थं समुचितप्रशिणोपायानां चिन्तनम्।

8.भौतिकाध्यात्मिकवादयोः मध्ये समुचितसामञ्जस्यस्य अभिज्ञानमिति।

9.अध्यापकः प्रात्यहः स्वमूल्याङ्कं कुर्यात्।

10.समयपालनं सम्यक् कुर्यात्।

12. आदर्शव्यात्वित्वम् निर्माणं कुर्यात्।

उच्यते यत्- "**वस्त्रेण वपुषा वाचा विद्यया विनयेन च।**

**वकारैः पञ्चभिर्युक्तः नरो भवति पूजितः।।**"

**शिक्षकानां कार्यशैली-**

शिक्षकानां विकासप्रक्रियायां प्रधानाः अवधारणाः इत्थं भवितुमर्हन्ति- **श्रुयते च अध्यापकाः मित्रम्, दार्शनिकम्, मार्गदर्शकश्च** भवन्ति।

1. मूल्यानि वैयक्तिकसम्प्रत्ययाः तानि जीवनपरिस्थितेः स्पष्टता द्वारा अभिगम्यन्ते।
2. मूल्यानि वैयक्तिकसामाजिकव्यवहारस्य सर्वप्रकारेषु विकसन्ति।
3. व्यवहारे विकसितदिशा मूल्यानां व्यवस्थिताध्ययनं सम्भवम्।
4. सामाजिकीकरणवैकासिकप्रक्रियाभ्यां द्वाभ्यां नैतिकमानवस्य विकासः सम्भवति।
5. सामाजिकीकरणप्रक्रियाभ्यां मानवः स्वीयसंस्कृतेः वैशिष्ट्यानि अधिगच्छति।
6. वैकासिकप्रक्रियायां मानवः नैतिकविमर्शनेन स्वीयबुद्धिवैभवं वर्धयति।

**अध्यापकस्य उत्तरदायित्वानि-**

भवनस्य दृढाता तदा भवति यदा स्तम्भः दृढः भवति। तथा समाजस्य भाविनागरिकनिर्माता स्तम्भसदृशः भवति अध्यापकः। तदर्थं अध्यापकानां मूल्यज्ञानं सम्यक् भवेत् । तदा बालकस्य सर्वाङ्गिनविकासं कर्तुं शक्नोति। अध्यापकस्य उत्तरदायित्वविकासे दशसिद्धान्ता –

1.सदाचारपालनम्	2.सत्यपरिपलनम्

3.अहिंसापालनम्	4.मातृपितृगुरुभक्तिः

5.पारलौकिकभावनायाः विकासः	6.धर्माचरणम्

7.परोपकारः	8.समाजसेवा(राष्ट्रसेवा)

9.विश्वबन्धुत्वभावना	10.पुनजन्मभावनायाः विश्वासः

1.**सदाचारपालनम्-** जीवने यदि किञ्चन शाश्वतं तत्त्वं वर्तते तर्हि तद्सत्यमेव। चरित्ररक्षणेनैव मानवः देवत्वं प्राप्नोति। तदभावे दानवत्वं पिशाचत्वं वा गच्छेत्। अत एव महाभारते उक्तम्-

**वृत्तं यत्नेन संरक्षेत् वित्तमायाति याति च।**

**अक्षीणो वित्ततः क्षीणः वृत्ततस्तु हतो हतः।**

वेदेप्युक्तमस्ति-

**परिमाग्ने दुश्चरिताद् बाधस्वा मा सुचरिते भज।**

**उदायुषा स्वायुषो दस्थाममृतां अनु।।**

सदाचारपालने ब्रह्मचर्यस्य महत्त्वं वर्तते। ब्रह्मचर्येण तपसा देवा मृत्युमपाह्वत। एवं च चरित्ररक्षा शीलरक्षा चेत्यादिगुणाः सदाचारपलणे विशेषतोऽवधेयाः।

2. **सत्यपरिपालनम्-** सर्वदा सत्यं वदेत्। कारणं धर्मस्य मूलं सत्यमेव भवति। उक्तञ्च मण्डुकोपनिषदि – **सत्यमेव जयते** नाऽनृतं सत्येन पन्था विततो देवयानः। अन्यच्च-

सत्येन धार्यते पृथ्वी सत्येन तपते रविः।

सत्येन वाति वायुश्च सर्वं सत्ये प्रतिष्ठितम्।।

3. **अहिंसापालनम्-** मनसा वाचा कर्मनणा सर्वविधहिंसानां परित्याग एव अहिंसा। तदर्थं अध्यापकान् योगशास्त्रं शिक्षणियम्। महर्षि पतञ्जलिना उक्तम्- **अहिंसासत्यास्तेयाऽपरिग्रहाः यमाः**। अत्र अहिंसा नाम वैरित्यागः। महाभारते उक्तम्- अहिंसा परमोधर्मः।अनेन अध्यापकस्य मानवीयमूल्यस्य विकासो भवतीति।

4.**मातृपितृगुरुभक्तिः**- अध्यापकानां मानमूल्यविकासाय मातृपितृगुरुभक्तिविकासाय च उपनिषद् ज्ञानं देयम्। यतो हि तैत्तिरीयोपनिषदि अस्ति यत्- **मातृदेवो भव पितृदेवो भव आचार्यदेवो भव।**

**5.पारलौकिकभावनायाः विकासः-** जगदिदं नश्वरं कीर्त्तिरेव एका अविनाशिनी भवति। कीर्त्तियस्य स जीवति। आत्मा तु अविनश्वरः ,तस्य विनासं न भवति। गीतायाम् उक्तं-

**नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः।**

**न चैनं क्लेदयन्त्याऽपो न शोषयति मारुतः।।**

अतएव गीतादिपारलौकिकशास्त्रज्ञानेन आधुनिकाध्यापकानां मानवीयमूल्यानां विकासः भविष्यति।

6. **धर्माचरणम्**- धर्म एव जीवनस्य सारः। धर्मो जीवनरक्षकः उच्यते। मनुस्मृतौ उक्तमस्ति- **धर्मो रक्षति रक्षितः**। अतएव जगति धर्म एव सर्वोत्कृष्टः।तदर्थं अध्यापकेषु धर्मशास्त्राणां ज्ञानं दीयते चेत् तेषां मानवीयमूल्यानां विकासं भवतीति।

7. **परोपकारः**-परेषामुपकारः परोपकारः इत्युच्यते। समाजे मानवः परस्य हितसाधनार्थं यत्किञ्चित् मनसा,वाचा, कर्मणा वा सर्वं परोपकारत्वेन उच्यते। पुराणेषु उक्तम्-**परोपकारः पुण्याय पापाय परपीडनम्।** अध्यापकानां परोपकारभावनावर्धनाय पुराणादि शास्त्रस्य ज्ञानं देयम्।

8. **समाजसेवा(राष्ट्रसेवा)-** यदा समाजस्य उन्नतिः भवति तदा स्वस्यापि उन्नति एव। अत एव समाजस्य हितसम्पादनार्थं स्वामी विवेकानन्दः,स्वामी दयानन्दः ,सुभाषचन्द्रबोसः,महात्मा गान्धी इत्यादयः महापुरुषाः तत्पराः आसन्। अध्यापकः यदि महपुरुषाणां जीवनचरितं पठति तर्हि तेषां समाजसेवामुलकं मानवमूसल्यानि वर्धयिष्यन्ति।

9.**विश्वबन्धुत्वभावना-** जगदिदं सुखदुःखात्मकं भवति । यदि मानवो मानवं स्ववन्धुत्वदृशा निरीक्षते तर्हि दुःखं नश्येत्। अथर्ववेदे उक्तमस्ति- **बिश्वमेकं भवेत् नडम्।**

श्रेष्ठानां सदा विस्तृता भावना भवति-

**अयं निजः परो वेति गणनालघुचेतसाम्।**

**उदारचरितानां तु वसुधैव कुटुम्वकनम्।।**

एवमुपायेन नीति शास्त्रादिज्ञानेन आधुनिकाध्यापकाः मानववोधस्म्पन्नाः भविष्यन्तीति मन्ये।

10. **पुनर्जन्मभावनायाः विकासः-** भावि अध्यापकानां पुनर्जन्मविषये ज्ञानं देयं यत् – कर्मानुरुपं सर्वस्यापि जन्तोः पुनर्जन्म भवति। उक्तं च गीतायाम्-

**जातस्य हि ध्रुवं मृत्युः जध्रुवं जन्म मृतस्य च।**

**तस्मादपरिहार्येऽर्थे न त्वं शोचितुमर्हसि।।**

एतेषां ज्ञानेन अध्यापकाः भ्रष्टाचारमुक्तं भविष्यति।

प्राचीनकाले अध्यापकस्य वहुनि पर्यायपदानि आसन्। ते यथा गुरुः,आचार्योः,अध्यापकः,शिक्षकः,उपाध्यायः,

अध्यापनवृत्तिः,वोधकः,देशिकः इत्यादयः सन्ति। एतेषां पदानां उत्तमज्ञानेन अद्यत्वे द्विक्भ्रष्टा अध्यापकाः मूल्यज्ञानयुक्ता भवेयूः।

गुरुः- **गृणाति गायत्र्यादिकमुपदिशति इति गुरुः।**

तथा च –

**गुकारस्तवन्धकारस्य रुकारस्तन्निरोधकः।**

**अन्धकारनिरोधत्वात् गुरुरित्यभिधीयते।।**

आचार्यः- **उपनीय तु यः पूर्वं वेदमध्यापयेद्विजः,**

**साङ्गं च सरहस्यं च तमाचार्यं विदुर्बुधाः** इति मनोर्वचनम्।

एवमुपायेन प्राचीनसंस्कृतस्य तथा च भारतीयसंस्कृतेः ज्ञानेन अध्यापकानां मानवमूल्यविकासो भविष्यतीति। छात्राधारितशिक्षाव्यवस्थायां छात्रस्तु भगवतः अद्वितीयं स्वरुपं मन्तव्यम्। अतः तेषां मानसिकीस्थितिं ज्ञात्वा पाठनीयम्। पक्षपातदोषरहितं च भवेदिति। छात्रस्य समस्याम् अवगत्य तत्परिहारोपाय करणीयम् शिक्षकस्य। यतोहि शिक्षकस्य हस्ते एव देशस्य भाविनागरिकनिर्माणं भवतीति।